# 18 - अष्टादश दशकम्

## पृथु चरितम्

जातस्य ध्रुवकुल एव तुङ्ग कीर्ते:
अङ्गस्य व्यजनि सुतस् स वेन नामा ।
तद्दोष व्यथित मतिस् स राजवर्य:
त्वत्पादे निहितमना वनं गतोऽभूत् ॥ ॥18-1॥

पापोऽपि क्षितितल पालनाय वेन:
पौराद्यै रुपनिहित: कठोर वीर्य: ।
सर्वेभ्यो निजबल मेव सम्प्रशंसन्
भूचक्रे तव यजना न्ययं न्यरौत्सीत् ॥ ॥18-2॥

सम्प्राप्ते हित कथनाय ताप सौघे
मत्तोऽन्यो भुवन पतिर् न कश्चनेति ।
त्वन् निन्दा वचन परो मुनीश्वरैस् तै:
शापाग्नौ शलभ दशा मनायि वेन: ॥ ॥18-3॥

तन्नाशात् खलजन भीरुकैर् मुनीन्द्रै:
तन्मात्रा चिर परिरक्षिते तदङ्गे ।
त्यक्ताघे परिमथिता दथोरु दण्डात्
दोर्दण्डे परिमथिते त्वमाविरासी: ॥ ॥18-4॥

विख्यात: पृथु रिति ताप सोपदिष्टै:
सूताद्यै: परिणुत भावि भूरि वीर्य: ।
वेनार्त्या कबलित सम्पदं धरित्रीम्
आक्रान्तां निज धनुषा समा मकार्षी: ॥ ॥18-5॥

भूयस्तां निजकुल मुख्य वत्स युक्त्यै:
देवाद्यैस् समुचित चारु भाजनेषु ।
अन्नादी न्यभिलषितानि यानि तानि
स्वच्छन्दं सुरभि तनू मदूदुहस् त्वम् ॥ ॥18-6॥
आत्मानं यजति मखैस् त्वयि त्रिधामन्
आरब्धे शततम वाजिमेध यागे ।
स्पर्धालुश् शत मख एत्य नीचवेष:
हृत्वाऽश्वं तव तनयात् पराजितोऽभूत् ॥ ॥18-7॥

देवेन्द्रं मुहुरिति वाजिनं हरन्तं
वह्नौ तं मुनिवर मण्डले जुहूषौ ।
रुन्धाने कमल भवे क्रतोस् समाप्तौ
साक्षात्त्वं मधुरिपु मैक्षथास् स्वयं स्वम् ॥ ॥18-8॥

तद् दत्तं वर मुपलभ्य भक्ति मेकां
गङ्गान्ते विहित पद: कदापि देव ।
सत्रस्थं मुनि निवहं हितानि शंसन्
ऐक्षिष्ठास् सनक मुखान् मुनीन् पुरस्तात् ॥ ॥18-9॥

विज्ञानं सनक मुखोदितं दधान:
स्वात्मानं स्वयमगमो वनान्त सेवी ।
तत् तादृक् पृथु वपुरीश सत्वरं मे
रोगौघं प्रशमय वात गेह वासिन् ॥ ॥18-10॥

॥ सदा सर्वत्र गोविन्द नाम संकीर्तनम् गोविन्दा....गोविन्दा ॥
॥ श्री गुरुवायूरप्पा शरणम् श्री हरये नम:॥